# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्री-३ (SEM-6) | **प्रश्नपत्रम् – ४** | गुणाः - ७० |
| विषयः – साहित्यशास्त्रम् | ---- | समयः - ११ तः २ |
| दिनाङ्कः – २१/४/२०१६ | सन्दर्भग्रन्थः – साहित्यदर्पणे ८,९,१० परिच्छेदाः | |

**प्रथमान्वितिः -१**

**प्रश्नः -१** **द्वयोः ससन्दर्भं व्याख्या कार्या ।** ०८

(१) चित्तद्रवीभायमयो ह्लोदो माधुर्यमुच्यते ।

(२) क्वचिद्दोषस्तु समता मार्गाभेदस्वरूपिणी ।
अन्यथोक्तगुणेष्वस्या अन्तःपातो यथायथम् ॥

(३) क्वचित्तु वक्त्राद्यौचित्यादन्यथा रचनादयः ।

**प्रश्नः -२** के गुणाः ? इति विलिख्य ग्रन्थोक्तदिशा तेषां स्वरूपं विवेचयत ।

अथवा ०८

रीतिलक्षणे प्रतिपाद्य ग्रन्थोक्तदिशा रीतिभेदान् सोदाहरणं लिखत ।

**प्रश्नः -३** **टिप्पणीद्वयं नातिविस्तरेण लेख्यम् ।** ०४

(१) ओजसः व्यञ्जकाः वर्णाः ।

(२) न गुणत्वं समाधेश्च ।

(३) दशशब्दगुणानामन्तर्भावः ।

(४) द्रवीभावः ।

**प्रश्नः - ४** **पञ्चप्रश्नाः एकैकवाक्यद्वारा समाधेयाः ।** ०५

(१) अर्थव्यक्तेः प्राचीनाचार्यानुसारं किं लक्षणम् ?

(२) विकटत्वं किम् ?

(३) श्रुतिमात्रतः अर्थबोधकाः शब्दाःकस्य गुणस्य व्यञ्जकाः ?

(४) नवमे परिच्छेदे कस्य वर्णनम् ?

(५) डम्बरबद्धा रीतिः का ?

(६) “उपकर्त्री रसादीनाम्” इत्यत्र “रसादीनाम्” इत्यस्य कोऽभिप्रायः ?

(७) माधुर्यव्यञ्जकैर्वर्णैः का रीतिः ?

**द्वितीयान्वितिः - २**

**प्रश्नः -५** **द्वयोः ससन्दर्भं व्याख्या कार्या ।** ०८

(१) सत्यर्थे पृथगर्थायाः स्वरव्यञ्जसंहतेः ।
क्रमेण तेनैषावृत्तिर्यमकं विनिगद्यते ॥

(२) साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः ।

(३) दृश्यन्ते क्वचिदारोप्याः श्लिष्टा साङ्गेऽपि रूपके ।

**प्रश्नः -६** विश्वनाथोक्तदिशा उत्प्रेक्षालङ्कारं सोदाहरणं सभेदं निरूपयत । ०८

अथवा

अनुप्रासलक्षणं विलिख्य विश्वनाथोक्तदिशा तद्भेदान् सोदाहरणं प्रतिपादयत ।

**प्रश्नः -७ टिप्पणीद्वयं लेख्यम् ।** ०४

(१) विभावना (२) विशेषोक्तिः (३) रूपकम् (४) अपह्नुतिः

**प्रश्नः -८ पञ्चानाम् एकैकवाक्यद्वारा उत्तरलेखनं करणीयम् ।** ०५

(१) अनन्वयलक्षणं किम् ?

(२) उपमायाः कति प्रकाराः ?

(३) उत्प्रेक्षावाचकशब्दाः के ? नामानि लिखत ।

(४) अतिशयोक्तिः कतिविधा ?

(५) लुप्तोपमा कदा भवेत् ?

(६) रूपकस्य कति भेदाः ?

(७) अलङ्कार लक्षणं किम् ?

## तृतीयान्वितिः - ३

**प्रश्नः -९ द्वयोः ससन्दर्भं व्याख्या कार्या ।** ०८

(१) सम्भवन् वस्तु सम्बन्धोऽसम्भवन् वाऽपि कुत्रचित् ।
यत्र बिम्बानुबिम्बत्वं बोधयेत्सा निदर्शना ॥

(२) समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः ।
व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः ॥

(३) मिथोऽनपेक्षयैतेषां स्थितिः संसृष्टिरुच्यते ।

**प्रश्नः -१०** अर्थान्तरन्यासः सोदाहरणं सभेदं ग्रन्थोक्तदिशा प्रतिपादनीयः । ०८

अथवा

विरोधालङ्कारः सोदाहरणं प्रतिपादनीयः ।

**प्रश्नः -११ एका टिप्पणी लेख्या ।** ०२

(१) प्रतिवस्तूपमा (२) दृष्टान्तः

**प्रश्नः -१२ द्वयोः एकैकवाक्यद्वारा उत्तरलेखनं करणीयम् ।** ०२

(१) कारणमालायाः लक्षणं किम् ?

(२) सङ्करलक्षणं किम् ?

(३) एकवल्याः लक्षणं किम् ?

***